दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लदशमी-एकादशी
श्रावण 08 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-274 | 1 | जुलाई 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 दुर्घटना-निवारणाय महत् पदम्, मार्गनिर्माणस्य प्रत्येकचरणे भविष्यति सुरक्षायाः परीक्षणम्

3 नीट-प्रश्नपत्र-रहस्योद्घाटन-विवादस्य मध्ये हिमाचलस्य सर्वकारीय-विद्यालयेषु बृहत्-निर्णयः

5 ओलम्पिक-पदकविजेत्री मुष्टियोद्ध्री (Boxer) लवलीना-बोरगोहेन-वर्या 'बाई' (Bye) इति प्राप्य साक्षात् उपांत्यफलागम-चक्रे (Semifinal)

## भारतस्य प्रथमः स्वदेशी-उत्क्षिप्त-टर्बो-जेट-इंजन-विकासः



भारतेन ३५० किलोग्राम्-प्रणोद-श्रेण्याः (Thrust Class) स्वकीयः प्रथमः स्वदेशी-विकिर्यः (Disposable) टर्बो-जेट-इंजनः विकसितः। एषः रक्षा-अनुसन्धान-विकास-सङ्घटनायाः (DRDO) गैस-टर्बाइन-अनुसन्धान-प्रतिष्ठानेन (GTRE) विकसितः अस्ति। रक्षा-मन्त्रालयेन उक्तं यत् डीआरडीओ-संस्थायाः आरेखणे (Design) आधारितस्य अस्य जटिल-तन्त्रस्य वितरणम् भारतीय-रक्षा-उद्योगस्य वर्धमानां प्राविधिक-क्षमताम् प्रदर्शयति। एतत् बहुवर्षाणां सटीक-अभियान्त्रिक्याः (Precision Engineering), उन्नत-विनिर्माणस्य तथा भारतस्य वैज्ञानिक-औद्योगिक-समुदाययोः मध्ये दृढ-सहभागितायाः परिणामः अपि अस्ति।

## प्रधानमन्त्री नरेन्द्र मोदी आश्वसयत् यत् छात्राणां भविष्य-रक्षणम् सर्वकारस्य वर्तते शीर्ष-प्राथमिकता



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी प्रत्यपादयत् यत्, नीट-प्रश्नपत्र-गोप्यताभङ्ग प्रकरणे संलिप्तेभ्यः दण्डप्रदानार्थं केन्द्रीय-सर्वकारः त्वरित-न्यायालयानां स्थापनं विधास्यति। सः दृढतया न्यगादीत् यत् छात्राणां भविष्यस्य रक्षणं सर्वकारस्य सर्वोच्च प्राथमिकता वर्तते। सामाजिक सञ्जालीय-पटले प्रधानमन्त्री प्राकटयत् यत्, देशस्य यूनां कल्याणात् भविष्याच्च अधिकं महत्त्वपूर्ण किमपि नास्ति । दिल्ल्याः जन्तर-मन्तर-स्थले नीट-प्रश्नपत्र-गोप्यताभङ्ग-प्रकरणमधिकृत्य छात्राणां जायमानस्य विरोध-प्रदर्शनस्य मध्ये एतत् वक्तव्यं समागतम्। प्रधानमन्त्रिणा प्रोक्तं यत् तेन सम्बद्धाधिकारिणः अस्मिन् विषये आवश्यक-पदक्षेपान् उत्थापयितुं निर्दिष्टाः। श्रीमोदी दृढतया प्रावोचत् यत्, ये यूनां भविष्यं हन्तुं प्रयतन्ते, ते सर्वथा नैव त्यक्ष्यन्ते । सः प्रोक्तवान् यत् छात्राणां हितानां रक्षायै उत्थापितेषु पदक्षेपेषु एव एषः निर्णयः गृहीतः ।**सर्वकारः संसदि 'नीट्'-प्रश्नपत्र-समस्यायाः स्थायी समाधानाय च एकां सुदृढां नीतिं विधातुं पूर्णतया सन्नद्धो वर्तते**

भाजपेतिदलस्य वरिष्ठः नेता, केन्द्रीय मन्त्री च जे. पी. नड्डाः अकथयत् यत् सर्वकारः संसदि 'नीट्'-प्रश्नपत्र-गोप्यताभंगप्रकरणस्य विषद्-चर्चायै, अस्याः समस्यायाः स्थायी समाधानाय च एकां सुदृढां नीतिं विधातुं पूर्णतया सन्नद्धो वर्तते। नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् श्रीनड्डाः प्रोक्तवान् यत् परस्परं दोषाधिकारे तथा मुहुर्मुहुः लक्ष्यात् विचलने निमग्नो न भूत्वा, विपक्षेण गभीर-विषयमादाय संसदि चर्चायां भागः ग्रहीतव्यः। श्रीनड्डाः सोद्वेगम् अवोचत् यत् कांग्रेस-नेता, लोकसभायां प्रतिपक्ष नेता च राहुल गांधी अस्मात् प्रकरणात् राजनैतिक-लाभं प्राप्तुं चेष्टते, एतत् सर्वथा शोचनीयम् अस्ति।

## सुभाषितम्

**न चात्मानं प्रशंसेद्वा, परनिन्दां च वर्जयेत्।**
**वेदनिन्दां देवनिन्दां, प्रयत्नेन विवर्जयेत्॥**

अर्थात्- देवता, गुरु और ब्राह्मण के लिये किये जाने वाले दान में रुकावट न डाले। अपनी प्रशंसा न करे तथा दूसरे की निन्दा का त्याग कर दे। वेद निन्दा और देव निन्दा का यत्नपूर्वक त्याग करे।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केताः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## मनिलायां भारतेन आतङ्कवादं प्रति असहिष्णुतायाः नीतिः पुनः प्रतिपादिता

फिलिपीन्स-देशस्य राजधान्यां मनिलायां आयोजिते त्रयस्त्रिंशत्तमे आसियान-क्षेत्रीय-मञ्चस्य मन्त्रीस्तरीय-सम्मेलने भारतेन आतङ्कवादं प्रति असहिष्णुतायाः नीतिः पुनः प्रतिपादिता। एतदतिरिच्य, भारतेन कस्यचन स्वतन्त्रस्य, उन्मुक्तस्य, समावेशिनः, नियमाधारितस्य च हिन्द-प्रशान्त क्षेत्रस्य रक्षणाय स्वस्य प्रतिबद्धता पुनरुदीरिता । सम्मेलनं सम्बोधयन् विदेशमन्त्री डॉ. एस. जयशङ्करः प्रावोचत् यत्, प्रवर्धमानानां वैश्विक-समस्यानां मध्ये हिन्द-प्रशान्त-क्षेत्रे राजनैतिक-सुरक्षा-विषयेषु चर्चायै एषः मञ्चः अति-महत्वपूर्णः वर्तते। अत्रावसरे डॉ. एस. जयशङ्करः ब्रुनेई-देशस्य विदेश-मन्त्रिणा राजकुमार-अब्दुल-मतीन इत्यमुना साकमपि द्विपक्षीय-सहयोगस्य प्रवर्धनाय विशेषतः कृत्रिम बुद्धिमत्तायाः ड्रोन्-प्रौद्योगिक्याः डिजिटल-नवप्रवर्तनस्य दृढीकरणाय वार्ताम् अकरोत्। सामाजिक सञ्जालीय-तन्त्रांशे असौ प्राकाशयत् यत्, भारत-



ब्रुनेई-देशौ भारतस्य ऐक्ट्-ईस्ट्-नीतेः अनुरुपं द्विपक्षीय-कार्यसूचीं अग्रे नेतुम्, आसियान-आधारान्तर्गतं बहुपक्षीय सहभागितां च सुदृढीकर्तुं च सम्मतिं प्रकटितवन्तौ । अपरतः, डॉ.एस.जयशङ्करः पापुआ न्यू गिनी-देशस्य विदेश-मन्त्रिणा जस्टिन् डब्ल्यू. इत्यमुना साकमपि भारत-प्रशान्त-द्वीप-सहयोग-मञ्चस्य माध्यमेन द्विपक्षीय-सहयोगस्य दृढीकरणाय उपवेशनम् अकरोत्।

## नीट-प्रश्नपत्र-गोप्यता-भङ्ग-प्रकरणे सर्वकारस्य आश्वासनानन्तरमपि

### विपक्षिभिः चर्चा अवरुध्यते-किरेनरिजिजुः



केन्द्रीय-संसदीय-कार्यमन्त्री किरेन रिजिजुः विपक्षी दलान्यालक्ष्य आरोपितवान् यत् नीट-प्रश्नपत्र-गोप्यताभङ्गप्रकरणे सर्वकारस्य आश्वासनानन्तरमपि विपक्षिभिः चर्चा अवरुध्यते । संसद्-परिसरे वार्तासरैस्सह भाषमाणः सः अवोचत् यत्, सर्वकारेण चर्चायाः याचना अङ्गीकृता , किन्तु विपक्षः नवीनान् पक्षाश्रयानारोप्य चर्चातः पलायनं करोति। श्रीरिजिजुः अवोचत् यत्, कांग्रेस-दलमपि चर्चावधौ स्वस्य याचनां वक्तुं शक्नोति ।

## मण्डवीया-महोदयस्य मालदीव-युगाण्डा-मन्त्रिभ्यां सह द्विपक्षीय-वार्ता

युव-कार्यक्रम-क्रीडा-मन्त्री डॉ. मनसुख-मण्डवीया स्कॉटलैण्ड्-देशस्य ग्लासगो-नगरे राष्ट्रमण्डल-क्रीडा-मन्त्रिणां सम्मेलनावसरे मालदीव-युगाण्डा-देशयोः स्व-समकक्ष-मन्त्रिभ्यां सह द्विपक्षीय-उपवेशने अकरोत्। सामाजिक-माध्यम-सन्देशे मण्डवीया-महोदयः अकथयत् यत् चर्चायाः मुख्यं केन्द्रं क्रीडासु अन्तर्राष्ट्रिय-सहयोगस्य सुदृढीकरणम् आसीत्। सः भारतस्य विश्वस्तरीय-क्रीडा-संरचनायाः, क्रीडा-विज्ञाने वर्धमानायाः विशारदतायाः (विशेषज्ञतायाः), क्रीडक-विकासस्य तथा उच्च-प्रदर्शन-प्रशिक्षण-प्रणाल्याः उपरि प्रकाशम् अक्षिपत्।

# दुर्घटना-निवारणाय महत् पदम्, मार्गनिर्माणस्य प्रत्येकचरणे भविष्यति सुरक्षायाः परीक्षणम्




**हिमसंस्कृतवार्ताः- शिमला।** वर्ष २०२३ तमस्य वर्षस्य तुलनायां वर्ष २०२४ मध्ये मार्ग-बसदुर्घटनासु ६.४८ प्रतिशतं (6.48%) यावत् ह्रासे (न्यूनतायाम्) आगते सत्यपि, हिमाचलप्रदेशसर्वकारेण मार्गसुरक्षां इतोऽपि सुदृढां विधातुं दुर्घटनानां न्यूनीकरणाय च उद्देश्येन अन्यः एकः महत्त्वपूर्णः उपायः गृहीतः। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन प्रतिपादितं यत् राज्यसर्वकारेण लोकनिर्माणविभागस्य अधीने आगच्छन्तीनां रथ्यानां कृते 'मार्गसुरक्षा-परीक्षणनीतिं' प्रवर्त्य अनुमतिः प्रदत्ता, येन मार्गसुरक्षा राज्ये मार्गाणां योजनायाः, संरचनायाः, निर्माणस्य, सञ्चालनस्य, संवर्धनस्य च अभिन्नः भागः विधातुं शक्येत। विशेषरूपेण हिमाचलसदृशे पार्वत्यराज्ये दुर्गमभूभागे, तीक्ष्णवृत्तेषु, प्रतिकूलेषु वातावरणपरिस्थितिषु च अतिरिक्ताः सङ्कटाः उत्पद्यन्ते, येन मार्गसुरक्षा गम्भीर सार्वजनिक- चिन्तायाः विषयः संजाता अस्ति। मार्गसुरक्षा- सम्बन्धीनां त्रुटीनां क्रमिक-परिचयस्य तासां प्रभाविनः निस्तारणस्य च आवश्यकतां ध्यात्वा राज्यसर्वकारेण 'भारतीय-मार्ग-काङ्ग्रेस' संस्थायाः दिशानिर्देशानां संस्तुतीनां च अनुरूपम् एका व्यापिका 'मार्गसुरक्षा-परीक्षण-संरचना' स्वीकृता। अस्याः नीतेः उद्देश्यं मार्ग-अधोसंरचनायां परिष्कारः, दुर्घटनानां सङ्कटस्य न्यूनीकरणं, सर्वेषां मार्ग- उपयोक्तॄणां कृते अधिकसुरक्षित- मार्गसञ्जालस्य विकासश्च अस्ति।

### पञ्चसु महत्त्वपूर्णेषु चरणेषु भविष्यति मार्गसुरक्षापरीक्षणम्

अस्याः नीतेः अन्तर्गतं कस्यापि मार्ग- परियोजनायाः पञ्चसु महत्त्वपूर्णेषु चरणेषु मार्गसुरक्षापरीक्षणं विधास्यते। एतेषु व्यवहार्यता अथवा प्रारम्भिकसंरचनाचरणं, विस्तृत-परियोजना- प्रतिवेदनचरणम्, निर्माणचरणम्, मार्गं यातायाताय उद्घाटनात पूर्वस्य चरणम्, पूर्वमेव निर्मितानां मार्गाणां परीक्षणं च समाविष्टम् अस्ति। व्यवहार्यताचरणे परीक्षकाः मार्गचयनस्य, मार्गसंरेखणस्य, चतुष्पथक्षेत्राणां, क्रॉससेक्शनक्षेत्राणां, विद्यमान-मार्ग-सञ्जालस्य च सम्पर्कस्य परीक्षणं करिष्यन्ति। विस्तृतसंरचनाचरणे ज्यामितीयसंरचनायाः, मार्गसंकेतकानां, मार्गचिह्नाङ्कनस्य, प्रकाशव्यवस्थायाः, संवेदनशील-मार्ग-उपयोक्तॄणां (यथा पदचारिणां चक्रचालकानां च) कृते सुविधानां, मार्ग-पार्श्व-सुरक्षा-प्रावधानस्य च विस्तृता समीक्षा विधास्यते।

### परीक्षण-परामर्शाणाम् अनुपालनस्य भविष्यति समीक्षा

निर्माणचरणस्य अवधौ परीक्षणे कार्यस्थलसुरक्षायाः, यातायात-प्रबन्ध-योजनायाः, श्रमिकाणां सुरक्षायाः, पूर्वं प्रदत्तानां परीक्षणपरामर्शाणाम् अनुपालनस्य च समीक्षा विधास्यते। मार्गं यातायाताय उद्घाटनात् पूर्वं दिवानिशयोः द्वयोः समययोः विस्तृतं निरीक्षणं भविष्यति। एतदतिरिच्य पूर्वमेव निर्मितानां मार्गाणां काले काले परीक्षणं विधास्यते येन उद्भवतां सङ्कटानां सुरक्षा-सम्बन्धीनां त्रुटीनां च परिचयं कृत्वा समयतः तासां समाधानं विधातुं शक्येत। नीत्यनुसारं मार्गसुरक्षा-परीक्षणं केवलं 'भारतीय- मार्ग- काङ्ग्रेस' पक्षतः प्रमाणीकृताः 'रोड- सेफ्टी- ऑडिटर' अथवा तादृशाः विभागीय-अधिकारिणः कर्मचारिणश्च करिष्यन्ति यैः १५ दिवसीयं मार्गसुरक्षा- परीक्षण-प्रशिक्षणं सफलतापूर्वेण पूर्णं कृतं स्यात् पार्वत्य-मार्गाणां निर्माणस्य च कमपि १० वर्षाणाम् अनुभवः भवेत्। साकमेव एतदपि अनिवार्यं कृतं यत् परीक्षकाः स्वतन्त्राः भवेयुः यस्याश्च परियोजनायाः परीक्षणं कुर्वन्तः सन्ति, तस्याः निर्माणेन, कार्यान्वयनेन सञ्चालनेन वा तेषां कश्चिद् प्रत्यक्षः सम्बन्धः न भवेत्।

### समर्पितः 'मार्गसुरक्षाप्रकोष्ठः' स्थापयिष्यते

संस्थागतव्यवस्थां इतोऽपि सुदृढां विधातुं लोकनिर्माणविभागस्य मुख्याकार्यालयस्य अन्तः एकः समर्पितः मार्गसुरक्षाप्रकोष्ठः' स्थापयिष्यते। एषः प्रकोष्ठः मार्गसुरक्षा- परीक्षणकार्यक्रमस्य कार्यान्वयनस्य निरीक्षणं विधास्यति, प्रगतेः आकलनं करिष्यति, योग्यानाम् परीक्षकाणां 'पैनल' इति रचयिष्यति, अनुपालन-प्रतिवेदनानं समीक्षां करिष्यति, अभियन्तॄणाम् अन्येषाम् हितधारकाणां च कृते प्रशिक्षण-जनजागरूकता-कार्यक्रमाणाम् आयोजनं विधास्यति। नीतौ एतदपि प्रावधानं विहितं यत् विभागस्य 'अभियन्तृ-प्रमुखेन' प्रत्येकस्मिन् त्रैमासे कार्यक्रमस्य समीक्षा विधास्यते, येन अस्य प्रभावशीलता सुनिश्चिता भवेत् आवश्यकाः परिष्काराश्च कर्तुं शक्येरन्।

### नीतौ अस्य महत्त्वपूर्णस्य प्रावधानस्य समावेशः

नीतेः एकं महत्त्वपूर्णं प्रावधानम् एतत् अस्ति यत् एककोटिलक्ष-रूप्यकाणि यावत् व्यययुक्तायां प्रत्येकस्यां मार्गपरियोजनायां मार्गसुरक्षापरीक्षणाय परियोजनाव्ययस्य एकं प्रतिशतं (1%) अनिवार्यरूपेण निर्धारितं भविष्यति। एतदतिरिच्य, मार्ग-संकेतकानां, मार्ग-चिह्नाङ्कनस्य, यातायात- शान्ततायाः उपायानां, कार्यस्थल-प्रबन्धनस्य, पदचारिसुविधानां, चक्रमार्गाणां, पार्वत्यमार्गाणां, सुरक्षा-अवरोधकानां, चतुष्पथक्षेत्राणां, ज्यामितीय- संरचनायाश्च सम्बद्धानां 'भारतीय- मार्ग- काङ्ग्रेस' इत्यस्याः विविधानां मानकानां मार्गदर्शिकानां च पालनम् अपि अनिवार्यं भविष्यति। अनेन एतत् सुनिश्चितं भविष्यति यत् हिमाचलप्रदेशे निर्मिताः मार्गाः सर्वोच्च- सुरक्षा- मानकानाम् अनुरूपाः भवेयुः सर्वेभ्यः मार्ग-उपयोक्तृभ्यश्च सुरक्षितां यात्राम् उपलब्धं कारयेयुः।

### मार्ग-सञ्जालम् अधिक-सुरक्षितं, सक्षमं, सुदृढं च विधातुं कटिबद्धाः स्मः- मुख्यमन्त्री

मुख्यमन्त्रिणा प्रतिपादितं यत् राज्यसर्वकारः हिमाचलप्रदेशस्य मार्ग-सञ्जालम् अधिक-सुरक्षितं, अधिक-सक्षमं, अधिक-सुदृढं च विधातुं कटिबद्धः अस्ति। प्रत्येकस्यां मार्गपरियोजनायां मानवजीवनस्य सुरक्षायाश्च सर्वोच्चा प्राथमिकता दीयेत। मार्गसुरक्षा-परीक्षणनीतिः विकासस्य प्रत्येकस्मिन् चरणे सम्भाव्यानां सङ्कटानां परिचयं कृत्वा समयतः आवश्यकानां परिष्कारात्मकानाम् उपायानां निश्चयं विधास्यति। सुरक्षिताः मार्गाः न केवलं दुर्घटनाः रोधयन्ति जनानां जीवनं च रक्षन्ति, अपि तु राज्ये आर्थिक-विकासम् उत्तम- सम्पर्क- व्यवस्थां च प्रोत्साहयन्ति।

## महिलानां सुरक्षा गरिमा च एकं सामूहिकम् उत्तरदायित्वम्



राष्ट्रिय-महिला-आयोगस्य अध्यक्षा विजया राहट्करवर्या अकथयत् यत् महिलानां सुरक्षा, गरिमा, स्वतन्त्रता च एकं सामूहिकम् उत्तरदायित्वम् अस्ति। सा महिलाः न्यवेदयत् यत् ताः अनुधावनस्य (Stalking) तथा च साइबर-अनुधावनस्य (Cyberstalking) घटनानां सूचनां शीघ्रमेव दद्युः। पुणेनगरे एकस्मिन् कार्यक्रमे सा अवदत् यत् महिलानां विरुद्धम् अनेके गम्भीराः अपराधाः अनुधावनेनैव आरभन्ते, अतः तासां यथाशीघ्रं सूचनाप्रदानम् अतीव आवश्यकम् अस्ति। सुश्री राहट्करवर्या अकथयत् यत् अनुधावनं साइबर-अनुधावनं च भारतीय-न्याय-संहितायाः ७८ तम्याः धारायाः अन्तर्गतं दण्डनीयौ अपराधौ स्तः। सा उक्तवती यत् महिलाः कस्मिंश्चिद् अपि आरक्षककेन्द्रे (पुलिस-स्थाने) 'शून्य-प्रथम-सूचना-प्रतिवेदनम्' (Zero FIR) पञ्जीकर्तुं शक्नुवन्ति तथा च अभियोगं पञ्जीकर्तुं तासां कृते सम्बद्धम् आरक्षककेन्द्रं गमनस्य आवश्यकता नास्ति।

## पाकिस्तानस्य मृषापवादाः किंवा निराधाराक्षेपाः भारतेन पूर्णतया प्रत्याख्याताः




संयुक्तराष्ट्रसङ्घ सिन्धु-जल-सन्धिम् अधिकृत्य पाकिस्तानस्य मृषापवादाः किंवा निराधाराक्षेपाः भारतेन पूर्णतया प्रत्याख्याताः। भारतेन समुदीरितं यत् यावत् इस्लामाबाद-आतङ्कवादः राजनीतेः साधनत्वेन प्रयुज्यते, तावत् अस्य सन्धेः स्वाभाविक-कार्यान्वयनस्य अपेक्षा नैव कर्तुं शक्यते। संयुक्तराष्ट्रसङ्घ भारतस्य स्थायी-प्रतिनिधिना राजदूत-पर्वतनेनि-हरीशेण सुरक्षापरिषदि एतत् प्रत्युत्तरं दत्तम्।

सायं स्कॉटलैण्ड-देशस्य ग्लासगो-नगरे त्रयोविंशतितमः राष्ट्र मण्डल क्रीडामहोत्सवः समारप्स्यते। दशदिनात्मक दीर्घ अस्मिन् महा-स्पर्धा-आयोजने चतुः सप्ततिः राष्ट्राणां क्रीडा-दलानि भागं ग्रहीष्यन्ति। ओलिम्पिक पदक विजेतारौ नीरज-चोपडा, मीराबाई-चानू, लोवलिना-बोरगोहेन च अस्मिन् महा-कुम्भे भारतस्य प्रतिनिधित्वं विधास्यन्ति। अस्मिन् वर्षे केवलं दश क्रीडा-स्पर्धाः समाविष्टाः सन्ति, याः द्वाविंशत्युत्तरद्विसहस्रतमवर्षे बर्मिंघम नगरे आयोजितानां क्रीडानां तुलनायां नव न्यूनाः सन्ति। एताः सर्वाः अपि स्पर्धाः चतुर्ष मुख्य-क्रीडाङ्गणेषु समायोजयिष्यन्ते।

# नीट-प्रश्नपत्र-रहस्योद्घाटन-विवादस्य मध्ये हिमाचलस्य सर्वकारीय-विद्यालयेषु बृहत्-निर्णयः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य सर्वकारीय- वरिष्ठ- माध्यमिक- विद्यालयेषु शिक्षाव्यवस्थां इतोऽपि पारदर्शिकां, उत्तरदायिनीं, तान्त्रिक-कौशल-आधारितां च विधातुं दिशि 'स्कूल-शिक्षा-निदेशालयेन' महत् पदं स्वीकृतम्। निदेशालयेन सर्वेषु सर्वकारीय- वरिष्ठ- माध्यमिक- विद्यालयेषु 'ऑडियो-वीडियो' युक्त- सी.सी.टी.वी. कैमरा-यन्त्राणां संस्थापनम् अनिवार्यं विहितम्। साकमेव शिमला-मण्डलस्य षट्-सर्वकारीयविद्यालयेभ्यः 'ऑनलाइन' निरीक्षणस्य अर्थात् 'वर्चुअल-इंस्पेक्शन' इत्यस्य आरम्भः अपि कृतः। नूतन-व्यवस्थायाः अन्तर्गतं शिक्षानिदेशकः अधुना निदेशालयात् एव कस्यापि विद्यालयस्य 'सजीव- निरीक्षणं करोति, छात्राणां शिक्षकाणां च उपस्थित्या सह शिक्षण-गतिविधिषु अपि दृष्टिः रक्ष्यते। प्रदेशस्य राजधान्याः शिमलायाः राजकीय- वरिष्ठ- माध्यमिक- विद्यालयेषु छोटा शिमला, लक्कड़ बाजार, लालपानी, मशोबरा, पोर्टमोर, संजौली इत्येतेषु 'ऑडियो- वीडियो' सी.सी.टी.वी. कैमरा-यन्त्राणि संस्थापितानि सन्ति। एतेषां सर्वेषां विद्यालयानां 'लाइव एक्सेस' साक्षात् 'स्कूल- शिक्षा- निदेशालयस्य' पार्श्वे अस्ति। शिक्षामन्त्रिणा रोहितठाकुरेण आरब्धस्य 'वर्चुअल-इंटरैक्शन' अनुप्रयोगस्य माध्यमेन एतेषां विद्यालयानां 'ऑनलाइन' निरीक्षणं क्रियते, विभागस्य अनुसारम् अस्याः प्रणाल्याः सर्वाणि परीक्षणानि सफलानि अभवन्। नूतनव्यवस्थायाः अन्तर्गतं कक्षासु, कर्मचारीकक्षेषु, विद्यालयपरिसरेषु अन्येषु च प्रमुखेषु स्थानेषु लग्नानां कैमेरा-यन्त्राणां 'लाइव फीड' साक्षात् निदेशालयं प्राप्स्यति। अनेन अध्ययनस्य, अनुशासनस्य, शिक्षकाणां छात्राणां च उपस्थित्याः, विद्यालयानां कार्यप्रणाल्याश्च नियमितनिरीक्षणं सम्भविष्यति। विभागस्य मतम् अस्ति यत् अनेन शिक्षाव्यवस्थायां पारदर्शिता वर्धिष्यते उत्तरदायित्वं च सुनिश्चितं भविष्यति।

## परीक्षा-केन्द्राणां स्वीकृतिप्राप्तौ सी.सी.टी.वी. अनिवार्यम्

'विद्यालयीय-शिक्षा-निदेशालयेन' स्पष्टीकृतं यत् येषु वरिष्ठ- माध्यमिक- विद्यालयेषु निर्धारितानां मानकानाम् अनुसारं 'ऑडियो-वीडियो' सी.सी.टी.वी. कैमरा-यन्त्राणि न संस्थापयिष्यन्ते, तेभ्यः बोर्ड-परीक्षाणां परीक्षा-केन्द्ररूपेण स्वीकृतिः न प्रदास्यते। अस्य निर्णयस्य उद्देश्यं परीक्षाप्रणालीं पूर्णतया पारदर्शिकाम्, निष्पक्षां, छद्मलेखन-मुक्तां च विधातुम् अस्ति। प्रदेशे वर्तमान-समये प्रायः १,९५० सर्वकारीयाः वरिष्ठ-माध्यमिकाः विद्यालयाः सञ्चालिताः सन्ति। निदेशालयस्य लक्ष्यं वर्तते यत् चरणबद्ध-रूपेण सर्वान् विद्यालयान् अस्मिन् 'ऑनलाइन' निरीक्षण-प्रणाल्या सह योजनीयम्। अस्य कृते सर्वे मण्डल-उपनिदेशकैः १५ दिनानाम् अभ्यन्तरे अनुपालन-प्रतिवेदनं याचितम्, यदा च सर्वे प्रधानाचार्याः निर्दिष्टाः यत् विद्यालयेषु संस्थापितानां सी.सी.टी.वी. यन्त्राणां 'लाइव एक्सेस' साक्षात् स्कूल-शिक्षा-निदेशालयेन सह योजनीयम्।

# HP NEWS- निजी-विद्यालयेषु गणवेश- टाई- उपानहानां विक्रये कृते निरंस्यते मान्यता, शिक्षा-निदेशालयेन प्रसारिताः आदेशाः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे विद्यालयीय-शिक्षा- निदेशालयेन निजी- विद्यालयान् प्रति स्पष्टसन्देशः दत्तः यत् शिक्षणं कुर्वन्तु, व्यापारं न। निदेशालयेन सर्वान् मण्डल- उपनिदेशकान् निर्देशान् प्रसार्य निजी- विद्यालयेषु गणवेश, टाई, पट्टिका, लाञ्छन (बैज) उपानह-सदृशानाम् वस्तूनां विक्रये सद्यः रोधं सुनिश्चितं कर्तुं कथितम्। नियमानाम् अवहेलनां कुर्वतां विद्यालयानां विरुद्धं कठोरकार्यविधिः विधास्यते आवश्यकतायां सत्यां तेषां मान्यता अनुमतिः वा अपि निरस्तीकर्तुं शक्यते। शिक्षा-निदेशालयेन प्रसारितेषु आदेशेषु स्पष्टीकृतं यत् विद्यालयपरिसरे व्यावसायिक-गतिविधीनाम् अनुमतिः दातुं न शक्यते। हिमाचलप्रदेश- स्कूल- शिक्षा- बोर्डस्य सम्बद्धतानियम १६.३.१२ (ए) इत्यस्य अन्तर्गतं बोर्डेन निर्धारितानां पाठ्यपुस्तकानां प्रायोगिक-पुस्तकानां च विक्रयः व्यावसायिक-गतिविधेः श्रेण्यां न रक्षितः, परन्तु गणवेशस्य अन्यासाम् विद्यालयसामग्रीणां च विक्रयः पूर्णतया व्यावसायिकगतिविधिः परिगणिष्यते।
प्रदेशे सुदीर्घकालात् निजी-विद्यालयैः निर्धारितेभ्यः आपणेभ्यः एव गणवेशस्य अन्य-सामग्र्याः च क्रयणस्य प्रभावसन्दर्भे उपालम्भाः सम्मुखम् आगच्छन्त्यः आसन्। बहुषु प्रकरणेषु अभिभावकाः विपणि-दरात् अधिकमूल्येन वस्तूनि क्रेतुं विवशाः भवन्ति स्म। शिक्षा-निदेशालयस्य मतम् अस्ति यत् अस्याः व्यवस्थायाः अभिभावकेषु अनावश्यकः आर्थिकभारः पतति। निदेशालयेन स्पष्टीकृतं यत् कस्यापि निजी-विद्यालयस्य परिसरे गणवेश- टाई- पट्टिका- लाञ्छन- उपानहानां वा अन्य- व्यावसायिक-वस्तूनां विक्रये कृते सति एतत् नियमानाम् उल्लङ्घनं परिगणिष्यते सम्बद्ध- विद्यालयस्य विरुद्धं च कार्यविधिः विधास्यते।

## पूर्वम् अपि प्रसारिताः सन्ति निर्देशाः

निदेशालयेन सचेतना दत्ता यत् भविष्ये यदि अस्मिन् सन्दर्भे किमपि उपालम्भः सत्या प्राप्स्यते तर्हि सम्बद्ध-विद्यालयस्य अनुमति-प्रमाणपत्रम् अपि निरस्तीकर्तुं शक्यते, यस्य सम्पूर्णं उत्तरदायित्वं विद्यालय-प्रबन्धनस्य भविष्यति। निदेशालयेन ज्ञापितं यत् अस्मिन् सन्दर्भे २७ जनवरी, २७ फरवरी २०२६ दिनाङ्के अपि निर्देशाः प्रसारिताः सन्ति। एतदतिरिच्य हिमाचलप्रदेश- स्कूल- शिक्षा- बोर्ड- धर्मशालायाः सचिवेन १० फरवरी २०२६ दिनाङ्के प्रेषितस्य पत्रस्य आधारेण अपि विद्यालयाः नियमानां सूचनां प्रापिताः आसन्।

# हिमाचले सप्ताहयावत् प्रवर्तिष्यते वर्षायाः क्रमः, २७ दिनाङ्के बहुषु मण्डलेषु अतिवृष्टेः नारङ्गसचेतना

**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** हिमाचले आगामि-सप्ताहं यावत् वर्षायाः क्रमः निरन्तरं स्थास्यति। अस्मिन् अवधौ राज्यस्य विविधेषु भागेषु सामान्यात् अतिवृष्टिः भवितुं सम्भावनाः प्रकटीक्रियन्ते। गुरुवासरे शिमलानगरेण सह राज्यस्य बहुषु भागेषु वर्षायाः क्रमः निरन्तरः आसीत्। राज्ये सतत्-वृष्ट्या बह्व्यः नद्यः, उपनद्यः च उच्छलिताः सन्ति। ऋतुविज्ञानविभागेन २९ जुलाई दिनाङ्कं यावत् प्रदेशस्य पृथक्-पृथक् भागेभ्यः 'पीत' तथा 'नारङ्ग-सतर्कता' इति सावधान-सूचनाः प्रसारिताः। प्रशासनेन जनेभ्यः नदी-उपनदीनाम् समीपे न गन्तुं, भूस्खलन-सम्भाव्यक्षेत्रेषु विशेषां सावधानतां ग्रहीतुं, विकट-ऋतौ निष्प्रयोजन-यात्राभ्यः दूरे स्थातुं च निवेदितम्। ऋतुविज्ञानविभागानुसारं २४ जुलाई दिनाङ्के बिलासपुरं, काङ्गड़ा, सोलनं, सिरमौरः मण्डलेषु अतिवृष्टेः पीत-सतर्कता स्थास्यति। २५ जुलाई दिनाङ्के चम्बा, काङ्गड़ा, कुल्लू, मण्डी, शिमला मण्डलेषु अतिवृष्टेः पीतसतर्कता कृता अस्ति। २६ जुलाई दिनाङ्के वर्षाकालेन (मानसून) इतोऽपि सक्रिय भवितुं सम्भावना अस्ति। अस्मिन् दिने काङ्गड़ा, मण्डी, शिमला, सिरमौर; मण्डलेषु अति-अतिवृष्टेः नारङ्गसतर्कता स्थास्यति, यदा च सोलन, चम्बा, बिलासपुरं मण्डलेषु पीत-सतर्कता कृता अस्ति। तदनन्तरं २७, २८, २९ जुलाई दिनाङ्केषु प्रदेशस्य बहुषु भागेषु अति-अतिवृष्टेः आशङ्कां ध्यात्वा नारङ्गसतर्कता प्रसारिता अस्ति। ऋतुविज्ञानकेन्द्र-शिमलायाः वैज्ञानिकेण संदीपकुमारशर्मणा प्रोक्तं यत् २४ तः २६ जुलाई अवधौ मध्यवर्ती-क्षेत्रेषु केषुचित् स्थानेषु अतिवृष्टिः भवितुं शक्नोति, यदा च २७ जुलाई दिनाङ्कतः वर्षायाः गतिविधयः इतोऽपि तीव्राः भवितुं सम्भावना अस्ति। तेन जनेभ्यः नदी-उपनदीनाम् खड्ड-क्षेत्राणां तटे न गन्तुं परामर्शः दत्तः, यतो हि अतिवृष्टौ जलस्तरः अकस्मात् वर्धितुं शक्नोति। तेन ज्ञापितं यत् वर्तमाने मानसून-ऋतौ प्रदेशे अधुना यावत् सामान्यात् ११ प्रतिशतं न्यूना वर्षा अभवत्। चम्बा, मण्डी, लाहौल स्पीति, काङ्गड़ामण्डलेषु सामान्यात् न्यूना वर्षा अभवत्। सतत्-वृष्ट्या तापमानस्य अपि लघु ह्रासः अभवत्। राज्यस्य औसत-अधिकतमं न्यूनतमं च तापमानं सामान्यात् अधः पञ्जीक्रियते। ऋतुविज्ञानविभागेन आगामिदिनेषु शिमला, सोलनं, सिरमौरः क्षेत्रेषु दृश्यता न्यूना स्थास्यति इति अपि आशङ्का प्रकटीकृता।

## नैनादेवी-क्षेत्रे अभवत् सर्वाधिका वर्षा

विगतेषु २४ घण्टासु बिलासपुरमण्डलस्य नैनादेवीक्षेत्रे ५६.२ मिलीमीटर, मलरांवक्षेत्रे ४९.४ मिलीमीटर, कुल्लूमण्डलस्य मनालीक्षेत्रे ३५.० मिलीमीटर, शिमलायाः रामपुरक्षेत्रे ३०.३ मिलीमीटर, बिलासपुरस्य ब्रह्माणीक्षेत्रे २९.४ मिलीमीटर, शिमलायाः सराहनक्षेत्रे २८.७ मिलीमीटर, सिरमौरस्य नाहनक्षेत्रे २७.८ मिलीमीटर, कुल्लूमण्डलस्य कोठीक्षेत्रे २६.० मिलीमीटर, शिमलायाः रोहड़क्षेत्रे २०.० मिलीमीटर, खदरालाक्षेत्रे च १९.१ मिलीमीटर वर्षा अभिलिखिता। यद्यपि गतेषु २४ घण्टेषु वर्षायाः तीव्रता पूर्वतुलनया काचित् न्यूना आसीत्, परन्तु सततवृष्ट्या बहुषु क्षेत्रेषु भूस्खलनस्य जलभरावस्य च स्थितिः निर्मिता अस्ति।

# जौनपुरजनपदे संस्कृतसम्भाषणशिविरस्य समापनम्





उत्तरप्रदेशसंस्कृतसंस्थानस्य "गृहे गृहे संस्कृतम्" योजनायाः अन्तर्गतं सञ्चालितस्य द्वादशदिवसीयस्य संस्कृतसम्भाषणशिविरस्य समापनसमारोहः जौनपुरजनपदस्य राममनोहरलोहियाविद्यालये सम्पन्नः।

कार्यक्रमस्य शुभारम्भः विद्यालयस्य निदेशकेन कप्तान् वी. पी. सिंह महोदयेन दीपप्रज्वलनेन, भगवत्याः सरस्वत्याः प्रतिमायाः माल्यार्पणेन च अभवत्। विद्यालयस्य प्रधानाध्यापकेन डॉ. अरविन्दयादवमहोदयेन निदेशकस्य माल्यार्पणपूर्वकं स्वागतं कृतम्। स्वीये सम्बोधने सः विद्यार्थिनः प्रेरितवान् यत् संस्कृतसम्भाषणं केवलं विद्यालयपर्यन्तं न सीमितं भवेत्, अपितु गृहे, परिवेशे, दैनिकजीवने च व्यवहाररूपेण अवश्यं प्रयुज्यताम्। संस्थानस्य प्रशिक्षिका पूणमसिंह महोदया शिविरे द्वादशदिनानि उत्साहपूर्वकं सहभागित्वा संस्कृतसम्भाषणम् अधीतवन्तः सर्वान् विद्यार्थिनः अभिनन्द्य तेषां उज्ज्वलभविष्यस्य शुभकामनाः व्यक्तवती। सा उक्तवती यत् शिविरे यदधीतं तज्ज्ञानं समाजेऽपि प्रसारयन्तु, यतः तेनैव संस्कृतभाषायाः प्रचारः प्रसारश्च सुदृढो भविष्यति। अस्मिन्नवसरे छात्राभ्यां जाह्नवी तथा नैन्सी इत्याभ्यां सरस्वतीवन्दना सादरं प्रस्तुता। अन्ते प्रशिक्षिका पूणमसिंह महोदया कल्याणमन्त्रेण शिविरस्य विधिवत् समापनम् अकार्षीत्।

अस्मिन् समारोहे विद्यालयस्य निदेशकः, प्रधानाचार्यः, प्रबन्धकः, शिक्षकाः, शिक्षिकाः तथा बहुसंख्यकाः छात्राः छात्र्यश्च उपस्थिताः आसन्।

## १२ दिवसीय सरलसंस्कृतसम्भाषण-शिविरस्य भव्यं समापनम्



उत्तरप्रदेशसंस्कृतसंस्थानं लखनऊ इत्यनेन संचालितस्य 'गृहे गृहे संस्कृतम्' शिविरस्य समापनं २३/०७/२०२६ दिनाङ्के प्रा. वि. मखदूमपुर लखनऊ गोमतीनगरविस्तारः इत्यत्र अभवत्। सत्रस्य समापनं प्रशिक्षिका ज्योति गुप्ता महोदया द्वारा मातुः सरस्वत्याः चित्रे माल्यार्पणं कृत्वा दीपं प्रज्वाल्य च कृतम्। उद्घाटनसत्रे प्रधानाचार्यः मनीषखरेमहोदयः स्वकीय उद्बोधने अकथयत् यत् संस्कृतेन एव संस्काराणां संस्कृतेश्च संरक्षणं विकासश्च कर्तुं शक्यते। 'गृहे गृहे संस्कृतम्' शिविरमाध्यमेन संस्कृतप्रशिक्षिकायाः अञ्जु मिश्रा महोदयया संस्कृतं सरलमाध्यमेन अभिनयगीतैः क्रीडाभिः च बालकेभ्यः सरलसम्भाषणस्य प्रशिक्षणं दत्तम्। छात्राः न केवलं व्यावहारिकज्ञानं शिक्षितवन्तः अपि तु तेषु अस्याः प्राचीनभाषायाः प्रति रुचिः अपि जागृता अभवत्। अस्मिन् अवसरे विद्यालयस्य समस्ताः शिक्षकाः, शिक्षकेतराः कर्मचारिणः, छात्राः च उपस्थिताः आसन्।

# छात्राणां भविष्यं–न राजनीतेः विषयः, अपितु राष्ट्रनीतेः प्राधान्यविषयः



– डॉ. राघवनाथझा

"सा विद्या या विमुक्तये।" इति भारतीयशिक्षादर्शनस्य मूलमन्त्रः। विद्या हि मानवमज्ञानात्, अन्यायात्, पराधीनतायाश्च विमोचयति। तस्याः प्रयोजनं न केवलं परीक्षासु सफलता, अपितु राष्ट्रस्य कृते सदाचारीणां, उत्तरदायिनां, योग्यनागरिकाणां निर्माणम् अस्ति। अतः प्रतियोगितापरीक्षासु अनियमितता, प्रश्नपत्रप्रस्रवणम् अथवा भ्रष्टाचारः केवलं परीक्षार्थिनां समस्या न, किन्तु सम्पूर्णराष्ट्रस्य भविष्यस्य प्रश्नः अस्ति।यदा परीक्षासु दोषाः प्रादुर्भवन्ति, तदा छात्राणां मनसि रोषस्य उत्पत्तिः स्वाभाविकी। बहुवर्षीयः परिश्रमः, मातापित्रोः त्यागः, उज्ज्वलभविष्यस्य च स्वप्नाः क्षणमात्रेण भग्नाः भवन्ति। तथापि अस्याः समस्यायाः स्थायी समाधानं केवलं मार्गेषु आन्दोलनैः न, अपितु संसदि विधानसभासु च गम्भीरविमर्शेन, नीतिनिर्माणेन, विधिसंशोधनेन च सम्भवति।

## महाभारते उक्तम्–"वादे वादे जायते तत्त्वबोधः"

अर्थात् विचारविनिमयेन संवादेन च एव सत्यस्य निर्णयः समाधानस्य च मार्गः प्रादुर्भवति। लोकतन्त्रे शान्तिपूर्णः संवैधानिकश्च विरोधः सर्वथा ग्राह्यः; किन्तु राष्ट्रहिताय स्थायिपरिवर्तनं तु सुदृढनीतिभिः, प्रभावीविधिभिः, उत्तरदायिशासनव्यवस्थया च एव साध्यते।अद्य कदाचित् छात्राः राजनीतेः साधनरूपेण उपयुज्यन्ते। यः युवा ग्रन्थालये, प्रयोगशालायां, अनुसन्धानकार्ये वा संलग्नः भवेत्, स एव घोषणाभिः आन्दोलनैश्च व्यस्तः दृश्यते। एषा प्रवृत्तिः राष्ट्रस्य बौद्धिकसम्पदः क्षयकारिणी अस्ति। छात्राः न कस्यचित् राजनैतिकदलस्य साधनम्, अपितु राष्ट्रस्य ज्ञानशक्तेः आधारस्तम्भाः सन्ति।अतः परीक्षा-व्यवस्थायाः पारदर्शिता वर्धनीया, प्रश्नपत्रसुरक्षायां आधुनिकप्रौद्योगिकी उपयोक्तव्या, समयबद्धान्वेषणव्यवस्था स्थापनीया, दोषिभ्यः शीघ्रं कठोरदण्डः प्रदेयः, नैतिकप्रशासनिकउत्तरदायित्वं च स्पष्टतया निर्धार्यम्। घटनानन्तरं केवलं प्रतिक्रिया न पर्याप्ता; अपितु पूर्वमेव दोषनिवारणक्षमव्यवस्था निर्मातव्या।यदि शिक्षाव्यवस्थायां जनविश्वासः दृढः भविष्यति, तर्हि राष्ट्रस्य प्रगतिः सुनिश्चितैव। यदि युवानां विश्वासः भग्नः भविष्यति, तर्हि प्रतिभा निरुत्साहिता भविष्यति, राष्ट्रस्य विकासोऽपि बाधितः भविष्यति। अतः इदानीं समयः न परस्परदोषारोपस्य, अपितु आत्ममन्थनस्य, सुधारस्य, राष्ट्रहितचिन्तनस्य च अस्ति।आवश्यकमिदम्—छात्रः राजनीतेः उपकरणरूपेण न दृश्यताम्, अपितु राष्ट्रनिर्माणस्य सहनिर्मातारूपेण सम्मान्यताम्। संसदि सार्थकः संवादः प्रवर्तताम्, सुदृढाः नीतयः निर्मीयन्ताम्, परीक्षा-व्यवस्था विश्वसनीया क्रियताम्, प्रत्येकः विद्यार्थी च दृढविश्वासेन स्वपरिश्रमस्य न्यायोचितं फलम् अवाप्नुयात्।"यदा युवाशक्तिः पुस्तकेन लेखन्या च सशक्ता भविष्यति, तदैव भारतं ज्ञान-विज्ञान-नैतिकनेतृत्वेषु विश्वस्य पथप्रदर्शकं भविष्यति।"

# ऑनलाइन-संस्कृत-सम्भाषणवर्गस्य शुभारम्भः




**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः।**

संस्कृतभारत्याः अवधप्रान्तेन आयोजितस्य ऑनलाइन- संस्कृत- सम्भाषणवर्गस्य शुभारम्भः बुधवासरे रात्रौ नववादने सफलतया सम्पन्नः। कार्यक्रमस्य प्रारम्भः आभासमहोदयेन वैदिक- मङ्गलाचरणेन अभवत्। ततः परम् आदरणीयेन देवेशकुमारमहोदयेन स्वागतभाषणं प्रस्तुत्य संस्कृतसम्भाषणस्य आवश्यकता, व्यवहारिकमहत्त्वं च प्रतिपादितम्।

अस्मिन्नवसरे संस्कृतभारत्याः अवधप्रान्तस्य मन्त्री आदरणीयः अनिलमहोदयः प्रेरणाप्रदमुद्बोधनं प्रदाय संस्कृतस्य दैनन्दिनव्यवहारे प्रयोगाय सर्वान् प्रेरितवान्। वर्गस्य प्रशिक्षिका शिखामिश्रामहोदया वर्गस्य रूपरेखाम्, अध्यापनपद्धतिं, उद्देश्यान् च विस्तरेण निरूप्य प्रतिभागिनां मार्गदर्शनम् अकरोत्। देशस्य विभिन्नप्रदेशेभ्यः समागताः संस्कृतप्रेमिणः प्रतिभागिनश्च उत्साहेन सहभागित्वा कार्यक्रमं सफलम् अकुर्वन्। अन्ते सत्येन्द्रपाठक-महोदयेन धन्यवादज्ञापनं कृतम्। शान्तिमन्त्रस्य सामूहिकपाठेन उद्घाटनसत्रस्य विधिवत् समापनम् अभवत्।

# डीपीएस-बोकारो-विद्यालये छात्रपरिषदः निवेशसमारोहः सम्पन्नः




**-सौरभः दे बोकारो, २३ जुलाई।** दिल्ली पब्लिक स्कूल, बोकारो-विद्यालये सत्रस्य २०२६–२७ कृते छात्रपरिषदः निवेशसमारोहः हर्षोल्लासेन सम्पन्नः। भारतीयलोकतन्त्रस्य भावनां सुदृढीकर्तुं षष्ठीकक्ष्यातः द्वादशीकक्ष्यापर्यन्तं विद्यार्थिभिः ई-मतदानप्रक्रियायां भागः गृहीतः। समारोहस्य मुख्यातिथिरासीत् उत्तर-छोटानागपुर-क्षेत्रस्य पुलिस-महानिरीक्षकः श्रीशैलेन्द्रकुमारसिन्हा (आई.पी.एस.)। तस्य स्वागतं आकर्षकेण स्केटिङ्ग-प्रदर्शनेन अभवत्। ततः प्रधानाचार्येण डॉ. ए. एस. गंगवारेण मुख्यातिथिना सह नवनिर्वाचितेभ्यः छात्रनेतृभ्यः पदचिह्नानि, पट्टिकाः तथा उत्तरदायित्वानि प्रदत्तानि। सर्वैः छात्रनेतृभिः विद्यालयस्य 'Service Before Self' इति आदर्शवाक्यस्य पालनस्य शपथः गृहीतः।

# स्कॉटलैण्डस्य ग्लासगो-नगरे त्रयोविंशतितम-राष्ट्रमण्डलक्रीडानाम् औपचारिकः शुभारम्भः



त्रयोविंशतितमानां (23rd) राष्ट्रमण्डलक्रीडानाम् (Commonwealth Games) औपचारिकः शुभारम्भः गतदिने स्कॉटलैण्ड-देशस्य ग्लासगो-नगरे अभवत्। दशदिनात्मक-अस्मिन् आयोजने ७४ देशानां दलानि भागं ग्रहीष्यन्ति। ओलम्पिक-पदकविजेतारः नीरज-चोपडा, मीराबाई-चानू, लवलीना-बोरगोहेन च 'राष्ट्रमण्डलक्रीडा-२०२६' इत्यत्र भारतस्य प्रतिनिधित्वं कृतवन्तः। अस्मिन् वर्षे १० क्रीडाः एव समाविष्टाः सन्ति, याः 'बर्मिंघम्-२०२२' इत्यस्य तुलनायां नव-क्रीडाभिः ऊनाः सन्ति। स्पर्धाः अष्ट-मील-परिमित-गलियारे (Corridor) चतुर्षु स्थानेषु आयोजयिष्यन्ते। एथलेटिक्स (धावनादि-क्रीडा), सन्तरणम् (तैराकी), ३×३ बास्केटबॉल, ट्रैक-साइकिल-चालनम्, भारोत्तोलनम्, बॉलिङ्ग्, आर्टिस्टिक्-जिम्नास्टिक्स, नेटबॉल, मुष्टिक्रीडा (बॉक्सिंग), जूडो च राष्ट्रमण्डलक्रीडानाम् अन्तर्गतं आगच्छन्ति। भारतेन पूर्वतन-राष्ट्रमण्डलक्रीडासु ६१ पदकानि जितानि आसन्। अस्मिन् वर्षे भारतीय-दले 'पैरा-एथलेटिक्स' (विकलाङ्ग-क्रीडकैः) सह १२५ सदस्याः समाविष्टाः सन्ति। अस्मिन् क्रीडामहोत्सवस्य उद्घाटनसमारोहे विविधदेशेभ्यः आगताः क्रीडकाः, प्रशिक्षकाः, अधिकारिणः च सोत्साहं भागम् अगृह्णन्। एतस्मिन् अवसरे सांस्कृतिककार्यक्रमाणां सुन्दरं प्रदर्शनम् अभवत्, येन सर्वेषां दर्शकानां मनांसि मोदितानि। क्रीडामहोत्सवेऽस्मिन् विश्वस्य विविधानाम् राष्ट्रणाम् उत्तमाः क्रीडकाः स्व-स्व-क्रीडाकौशलस्य प्रदर्शनं करिष्यन्ति। भारतस्य क्रीडकाः अपि अनेकासु क्रीडासु देशस्य प्रतिनिधित्वं कुर्वन्तः पदकप्राप्तये पूर्णप्रतिबद्धतायाः तत्पराः सन्ति।

## राष्ट्रमण्डलक्रीडासु (२०२६) भारतस्य विजयपूर्णः शुभारम्भः



राष्ट्रमण्डलक्रीडासु (Commonwealth Games 2026) गुरुवासरे भारतस्य दलम् उत्कृष्टं प्रदर्शनं कुर्वत् विजयपूर्णं शुभारम्भम् अकरोत्। महिला-युगल-बॉल्स-स्पर्धायाम् (Pairs Lawn Bowls) भारतेन माल्टा-देशस्य दलं रोमाञ्चकरे 'टाई-ब्रेक'-चक्रे पराजित्य स्व-अभियानस्य श्रीगणेशः कृतः। 'ग्रुप-बी' इत्यस्य अस्मिन् द्वन्द्वे रूपा-राणी-तिर्की-वर्यायाः पिङ्की-वर्यायाः च युगलम् उतीर्णम् आसीत्। अस्मिन् रूपा अग्रणी (Lead) तथा पिङ्की मुख्य-क्रीडकः (Skip) इति भूमिकां निर्ऊहत्। प्रथमं चक्रं (Set) भारतेन ७-१ इति अङ्कैः सुलभतया जितम्। किन्तु द्वितीये चक्रे माल्टा-देशस्य रेबेका-लूसी-रिक्किन् तथा कोनी-ले-रिक्किन् इत्येताभ्यां प्रत्यावर्तनं कृत्वा ४-३ इति अङ्कैः चक्रं स्वनाम्नि कृतम्। मैच-क्रीडायाम् १-१ इति समतायां सत्यां निर्णयः 'टाई-ब्रेक'-माध्यमेन अभवत्। टाई-ब्रेक-मध्ये एकस्मिन् समये भारतीय-युगलं पृष्ठतः आसीत्। परन्तु अन्तिमे कन्दुके पिङ्की-वर्यायाः अद्भुतेन प्रहारेण भारतं निर्णायकं प्राधान्यं प्राप्तवत्, भारतेन च एषा क्रीडा जिता।

## ओलम्पिक-पदकविजेत्री मुष्टियोद्ध्री (Boxer) लवलीना-बोरगोहेन-वर्या 'बाई' (Bye) इति प्राप्य साक्षात् उपांत्यफलागम-चक्रे (Semifinal) प्रविष्टा



राष्ट्रमण्डलक्रीडानां (Commonwealth Games 2026) उद्घाटनसमारोहात् (Opening Ceremony) पूर्वमेव भारतेन स्वस्य प्रथमं पदकं सुनिश्चितं कृतम्। ओलम्पिक-पदकविजेत्री मुष्टियोद्ध्री (Boxer) लवलीना-बोरगोहेन-वर्या 'बाई' (Bye) इति प्राप्य साक्षात् उपांत्यफलागम-चक्रे (Semifinal) प्रविष्टा, येन तस्याः पदकं पक्कम् अभवत्। मुष्टिक्रीडायां (Boxing) सेमिफाइनल-चक्रे पराजितयोः उभयोः मुष्टियोद्ध्रोः कांस्यपदकं (Bronze Medal) दीयते। अस्य अयम् अर्थः यत् ग्लासगो-नगरे स्वस्य प्रथमं द्वन्द्वं क्रीडनात् पूर्वमेव लवलीनायाः कांस्यपदकं निश्चितम् अभवत्। टोक्यो-ओलम्पिक-क्रीडासु कांस्यपदकं जितवती लवलीना-बोरगोहेन-वर्या 'बाय' प्राप्य महिलानां ७५ किलोग्राम-भारवर्गे साक्षात् उपांत्यफलागम-चक्रं प्राप्ता। अस्यां वर्ग-सूच्यां (Draw) केवलं पञ्च क्रीडकाः एव आसन्, अतः लवलीना-महोदयां विहाय द्वौ अपरौ क्रीडकौ साक्षात् सेमिफाइनल-चक्रं प्राप्तवन्तौ, अवशिष्टयोः द्वयोः क्रीडकयोः मध्ये तु एकमेव क्वार्टरफाइनल-द्वन्द्वम् आयोजितम् आसीत्।

## राष्ट्रमण्डलक्रीडायाः पूर्वमेव डोप-परीक्षणे असफलः भारतीय-जूडो-क्रीडकः अरुण-कुमारः

राष्ट्रमण्डलक्रीडानां (Commonwealth Games) प्रारम्भात् प्राक् एव भारतस्य जूडो-क्रीडकः अरुण-कुमारः 'डोप-परीक्षणे' (Dope Test) असफलः (विफलः) जातः। सः ७३ किलोग्राम-भारवर्गे स्वर्णपदकस्य प्रमुखाकांक्षी आसीत्। सम्प्रति सः भारतीय-दलात् बहिष्कृतः कृतः अस्ति।जूडो-फेडरेशन्-ऑफ्-इण्डिया इत्यस्य अध्यक्षः मुकेश-कुमारः उक्तवान् यत् अरुण-वर्यात् पदकस्य आशा आसीत्, किन्तु एतावति अल्पे समये तस्य विकल्पस्य (स्थानापन्न-क्रीडकस्य) चयनं न सम्भवति। मुकेश-महोदयः अकथयत्— "वयम् एकां सूचनां (Notice) प्राप्तवन्तः, यस्याम् १५ दिनानां अन्तः उत्तरं दातुं निर्दिष्टम् अस्ति। तस्मै स्वात्मानं समर्थयितुम् उत्तरदानस्य अवसरः प्राप्स्यते, परन्तु नियमानुसारं सः अस्यां प्रतियोगितायां भागं ग्रहीतुं न शक्नोति। एतावति स्वल्पे समये कस्यचित् अन्यस्य क्रीडकस्य समावेशनम् अपि न सम्भवति।"



## लौकिकन्यायकोशः (३५)

### कुशकाशावलम्बनन्यायः

कुशः , काशः इति तृणविशेषस्य नाम । आपत्काले तादृशस्य अल्पस्य आधारस्य साहाय्येन आपत्तितः आत्मानं रक्षितुं यदि कोऽपि इच्छेत् तर्हि तत् निष्फलं भवति इति बोधयितुमस्य न्यायस्य प्रयोगो भवति। द्रष्टव्यम् जैमिनिसूत्रव्याख्याने तन्त्र वार्तिके १-३-२४ ( पृष्ठे-२६८ )ब्रह्मसूत्रभाष्यकारैः अपि संप्रदायस्य समर्थनार्थ प्रयत्नाः कृताः। क्वचित मूलग्रन्थे वर्तमानं वाक्यमपि विपरिणमय्य स्वाभिप्रेतः अर्थः दर्शितः । तादृशः प्रयत्नः कुशकाशावलम्बनं भवति इति उच्यते ।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीररजः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः मया सङ्गृहीताः सन्ति। प्रथमा वार्ता बेङ्गलूरु-नगरात् प्राप्ता। तत्र एकस्मिन् जलपानगृहे अङ्कसङ्गणकेन कार्यं कुर्वत्सु जनेषु प्रतिघण्टम् नव-नवति-रूप्यकाणां शुल्कम् आरोपितम्।

**नन्दिनी-** अहो! कार्यं कर्तुं शुल्कम् आरोपितम् इति अतीव हास्यास्पदम्। अस्तु, मया अपि एका विचित्रा वार्ता श्रुता। आस्ट्रेलिया-देशे दूरदर्शनस्य एकस्मिन् साक्षात्-कार्यक्रमे एकेन नेत्रा उच्चेन ध्वनिना एकः श्वा भर्त्सितः।

**काव्या-** श्वा भर्त्सितः इति तु महद् आश्चर्यम्! सः नेता तु अतीव कुपितवान् अस्ति। अन्या वार्ता श्रूयताम्। स्पेन-देशस्य एकेन विमान-चालकेन विमाने यात्रिकाः वञ्चिताः। तेन विश्वचषक-क्रीडायाः असत्यः परिणामः यात्रिकेभ्यः निवेदितः।

**नन्दिनी-** असत्यः परिणामः निवेदितः इति तु अतीव कौतुकावहम्। यात्रिकाः तु क्षणमात्रं भीतवन्तः सन्ति। अन्तिमा वार्ता कनाडा-देशात् मया प्राप्ता। तत्र एकस्मिन् महामार्गे भारवाहनेन नील-बदरी-फलानां महान् राशिः भूमौ क्षिप्तः। वाहनानां चक्रैः तानि फलानि पिष्टानि। अतः मार्गे फलानां पङ्कः जातः। तेन वाहनानां गतिः अवरुद्धा।